नलोपाख्यानम्

20

बृहदश्व उवाच।

श्रुत्वा वचः सुदेवस्य ऋतुपर्णो नराधिपः।

सान्त्वयञ्श्लक्ष्णया वाचा बाहुकं प्रत्यभाषत॥ ३-६९-१ ॥

विदर्भान्यातुमिच्छामि दमदन्त्याः स्वयंवरम्।

एकाह्ना हयतत्त्वज्ञ मन्यसे यदि बाहुक॥ ३-६९-२ ॥

एवमुक्तस्य कौन्तेय तेन राज्ञा नलस्य ह।

व्यदीर्यत मनो दुःखात्प्रदध्यौ च महामनाः॥ ३-६९-३ ॥

दमयन्ती भवेदेतत्कुर्याद्दुःखेन मोहिता।

अस्मदर्थे भवेद्वायमुपायश्चिन्तितो महान्॥ ३-६९-४ ॥

नृशंसं बत वैदर्भी कर्तुकामा तपस्विनी।

मया क्षुद्रेण निकृता पापेनाकृतबुद्धिना॥ ३-६९-५ ॥

स्त्रीस्वभावश्चलो लोके मम दोषश्च दारुणः।

स्यादेवमपि कुर्यात्सा विवशा गतसौहृदा।

मम शोकेन संविग्ना नैराश्यात्तनुमध्यमा॥ ३-६९-६ ॥

nairāśya *n* – безнадежность, отчаяние;

न चैवं कर्हिचित्कुर्यात्सापत्या च विशेषतः।

यदत्र तथ्यं पथ्यं च गत्वा वेत्स्यामि निश्चयम्।

ऋतुपर्णस्य वै काममात्मार्थं च करोम्यहम्॥ ३-६९-७ ॥

इति निश्चित्य मनसा बाहुको दीनमानसः।

कृताञ्जलिरुवाचेदमृतुपर्णं नराधिपम्॥ ३-६९-८ ॥

प्रतिजानामि ते सत्यं गमिष्यसि नराधिप।

एकाह्ना पुरुषव्याघ्र विदर्भनगरीं नृप॥ ३-६९-९ ॥

ततः परीक्षामश्वानां चक्रे राजन्स बाहुकः।

अश्वशालामुपागम्य भाङ्गस्वरिनृपाज्ञया॥ ३-६९-१० ॥

स त्वर्यमाणो बहुश ऋतुपर्णोन बाहुकः।

अध्यगच्छत्कृशानश्वान्समर्थानध्वनि क्षमान्॥ ३-६९-११ ॥

तेजोबलसमायुक्तान्कुलशीलसमन्वितान्।

वर्जितांल्लक्षणैर्हीनैः पृथुप्रोथान्महाहनून्।

शुद्धान्दशभिरावर्तैः सिन्धुजान्वातरंहसः॥ ३-६९-१२ ॥

protha *n* – ноздри лошади;
āvarta *m* – вращение, оборот, поворот;
raṃhas *n* – быстрота;

दृष्ट्वा तानब्रवीद्राजा किंचित्कोपसमन्वितः।
किमिदं प्रार्थितं कर्तुं प्रलब्धव्या हि ते वयम्॥ ३-६९-१३॥
कथमल्पबलप्राणा वक्ष्यन्तीमे हया मम।
महानध्वा च तुरगैर्गन्तव्यः कथमीदृशैः॥ ३-६९-१४॥

बाहुक उवाच।

एते हया गमिष्यन्ति विदर्भान्नात्र संशयः।
अथान्यान्मन्यसे राजन्ब्रूहि कान्योजयामि ते॥ ३-६९-१५॥

ऋतुपर्ण उवाच।

त्वमेव हयतत्त्वज्ञः कुशलश्चासि बाहुक।
यान्मन्यसे समर्थांस्त्वं क्षिप्रं तानेव योजय॥ ३-६९-१६॥

बृहदश्व उवाच।

ततः सदश्वांश्चतुरः कुलशीलसमन्वितान्।
योजयामास कुशलो जवयुक्तान्रथे नरः॥ ३-६९-१७॥
ततो युक्तं रथं राजा समारोहत्त्वरान्वितः।
अथ पर्यपतन्भूमौ जानुभिस्ते हयोत्तमाः॥ ३-६९-१८॥
ततो नरवरः श्रीमान्नलो राजा विशां पते।
सान्त्वयामास तानश्वांस्तेजोबलसमन्वितान्॥ ३-६९-१९॥
रश्मिभिश्च समुद्यम्य नलो यातुमियेष सः।
सूतमारोप्य वार्ष्णेयं जवमास्थाय वै परम्॥ ३-६९-२०॥
ते चोद्यमाना विधिना बाहुकेन हयोत्तमाः।
समुत्पेतुरिवाकाशं रथिनं मोहयन्निव॥ ३-६९-२१॥
तथा तु दृष्ट्वा तानश्वान्वहतो वातरंहसः।
अयोध्याधिपतिर्धीमान्विस्मयं परमं ययौ॥ ३-६९-२२॥
रथघोषं तु तं श्रुत्वा हयसंग्रहणं च तत्।
वार्ष्णेयश्चिन्तयामास बाहुकस्य हयज्ञताम्॥ ३-६९-२३॥
किं नु स्यान्मातलिरयं देवराजस्य सारथिः।
तथा हि लक्षणं वीरे बाहुके दृश्यते महत्॥ ३-६९-२४॥
शालिहोत्रो ऽथ किं नु स्याद्धयानां कुलतत्त्ववित्।

मानुषं समनुप्राप्तो वपुः परमशोभनम्॥ ३-६९-२५॥

उताहो स्विद्भवेद्राजा नलः परपुरंजयः।

सो ऽयं नृपतिरायात इत्येवं समचिन्तयत्॥ ३-६९-२६॥

अथ वा यां नलो वेद विद्यां तामेव बाहुकः।

तुल्यं हि लक्षये ज्ञानं बाहुकस्य नलस्य च॥ ३-६९-२७॥

अपि चेदं वयस्तुल्यमस्य मन्ये नलस्य च।

नायं नलो महावीर्यस्तद्विद्यस्तु भविष्यति॥ ३-६९-२८॥

प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्।

दैवेन विधिना युक्ताः शास्त्रोक्तैश्च विरूपणैः॥ ३-६९-२९॥

भवेत्तु मतिभेदो मे गात्रवैरूप्यतां प्रति।

प्रमाणात्परिहीनस्तु भवेदिति हि मे मतिः॥ ३-६९-३०॥

वयःप्रमाणं तत्तुल्यं रूपेण तु विपर्ययः।

नलं सर्वगुणैर्युक्तं मन्ये बाहुकमन्ततः॥ ३-६९-३१॥

एवं विचार्य बहुशो वार्ष्णेयः पर्यचिन्तयत्।

हृदयेन महाराज पुण्यश्लोकस्य सारथिः॥ ३-६९-३२॥

ऋतुपर्णस्तु राजेन्द्र बाहुकस्य हयज्ञताम्।

चिन्तयन्मुमुदे राजा सहवार्ष्णेयसारथिः॥ ३-६९-३३॥

बलं वीर्यं तथोत्साहं हयसंग्रहणं च तत्।

परं यत्नं च संप्रेक्ष्य परां मुदमवाप ह॥ ३-६९-३४॥